दशरथ कृत शनि स्तोत्रम्

दशरथ उवाच ॥

नमः कृष्णाय नीलाय शितिकंठनिभाय च ।
नमः कालाग्निरूपाय कृतांताय च वै नमः ॥ 1 ॥

नमो निर्मांसदेहाय दीर्घश्मश्रुजटाय च ।
नमो विशालनेत्राय शुष्कोदरभयाकृते ॥ 2 ॥

नमः पुष्कलगात्राय स्थूलरोम्णेऽथ वै नमः ।
नमो दीर्घाय शुष्काय कालदंष्ट्र नमोस्तु ते ॥ 3 ॥

नमस्ते कोटराक्षाय दुर्निरीक्ष्याय वै नमः ।
नमो घोराय रौद्राय भीषणाय कपालिने ॥ 4 ॥

नमस्ते सर्वभक्षाय वलीमुख नमोस्तु ते ।
सूर्यपुत्र नमस्तेस्तु भास्करे भयदाय च ॥ 5 ॥

अधोदृष्टे नमस्तेस्तु संवर्तक नमोस्तु ते ।
नमो मंदगते तुभ्यं निस्त्रिंशाय नमोस्तु ते ॥ 6 ॥

तपसा दग्धदेहाय नित्यं योगरताय च ।
नमो नित्यं क्षुधार्ताय अतृप्ताय च वै नमः ॥ 7 ॥

ज्ञानचक्षुर्नमस्तेस्तु कश्यपात्मजसूनवे ।
तुष्टो ददासि वै राज्यं रुष्टो हरसि तत्क्षणात् ॥ 8 ॥

देवासुरमनुष्याश्च सिद्धविद्याधरोरगाः ।
त्वया विलोकिताः सर्वे नाशं यांति समूलतः ॥ 9 ॥

प्रसादं कुरु मे देव वरार्होऽहमुपागतः ॥ 10 ॥